श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे वेङ्कटगिरिमाहात्म्ये

# ॥ श्री वेङ्कटेशाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वेङ्कटेशाष्टकम् ॥

वेङ्कटेशो वासुदेवः प्रद्युम्नो-ऽमित-विक्रमः।
सङ्कर्षणो-ऽनिरुद्धश्च शेषाद्रि-पतिरेव च ॥ 1 ॥

जनार्दनः पद्मनाभो वेङ्कटाचल-वासिनः।
सृष्टि-कर्ता जगन्नाथो माधवो भक्तवत्सलः ॥ 2 ॥

गोविन्दो गोपतिः कृष्णः केशवो गरुड-ध्वजः।
वराहो वामनश्चैव नारायण अधोक्षजः ॥ 3 ॥

श्रीधरः पुण्डरीकाक्षः सर्वदेव-स्तुतो हरिः।
श्रीनृसिंहो महासिंहः सूत्राकारः पुरातनः ॥ 4 ॥

रमानाथो महीभर्ता भूधरः पुरुषोत्तमः।
चोळपुत्र-प्रियः शान्तो ब्रह्मादीनां वरप्रदः ॥ 5 ॥

श्रीनिधिः सर्वभूतानां भयकृद्-भयनाशनः।
श्रीरामो रामभद्रश्च भव-बन्धैक-मोचकः ॥ 6 ॥

भूतावासो गिरावासः श्रीनिवासः श्रियःपतिः।
अच्युतानन्त-गोविन्दो विष्णु-र्वेङ्कट-नायकः ॥ 7 ॥

सर्वदेवैक-शरणं सर्वदेवैक-दैवतम्।
समस्त-देव-कवचं सर्वदेव-शिखामणिः ॥ 8 ॥

इतीदं कीर्तितं यस्य विष्णो-रमित-तेजसः।
त्रिकाले यः पठेन्नित्यं पापं तस्य न विद्यते ॥ 9 ॥

राजद्वारे पठेद्-घोरे सङ्ग्रामे रिपु-सङ्कटे।
भूत-सर्प-पिशाचादि*-भयं नास्ति कदाचन॥ 10॥

अपुत्रो लभते पुत्रान् निर्धनो धनवान् भवेत्।
रोगार्तो मुच्यते रोगात् बद्धो मुच्येत बन्धनात्॥ 11॥

यद्य-दिष्टतमं लोके तत्तत्-प्राप्नोत्य-संशयः।
ऐश्वर्यं राजसन्मानं भुक्ति-मुक्ति-फलप्रदम्॥ 12॥

विष्णो-र्लोकैक-सोपानं सर्वदुःखैक-नाशनम्।
सर्वैश्वर्य-प्रदं नृणां सर्वमङ्गळ-कारकम्॥ 13॥

मायावी परमानन्दं त्यक्त्वा वैकुण्ठ-मुत्तमम्।
स्वामि-पुष्करिणी-तीरे रमया सह मोदते॥ 14॥

कल्याणाद्-भुत-गात्राय कामितार्थ-प्रदायिने।
श्रीमद्वेङ्कट-नाथाय श्रीनिवासाय ते नमः॥ 15॥

वेङ्कटाद्रि-समं स्थानं ब्रह्माण्डे नास्ति किञ्चन।
वेङ्कटेश-समो देवो न भूतो न भविष्यति॥ 16॥

॥ श्री वेङ्कटेशाष्टकं समाप्तम्॥